ऽभितापः स समीरणेन१ । यस्योष्णमङ्गारचितं यथैव भवेच्छिरो धूमवती च नासा । शीतेन रात्रौ च भवेद्विशेषः शिरोऽभितापः स तु पित्तकोपात्२ । शिरोगलं यस्य कफोपदिग्धं गुरु प्रतिष्टब्धमथो हिमञ्च । शूनाक्षिकूटं वदनं च यस्य शिरोऽभितापः स कफप्रकोपात्३ । शिरोऽभितापे त्रितयप्रवृत्ते४ सर्वाणि लिङ्गानि समुद्भवन्ति । रक्तात्मकः५ पित्तसमानलिङ्गः स्पर्शासहत्वं शिरसो भवेच्च । वसाबलासक्षतसम्भवानां शिरोगतानामिह संक्षयेण । क्षयप्रवृत्तः६ शिरसोऽभितापः कष्टो भवेदुग्ररुजोऽतिमात्रम् । संस्वेदनच्छर्दनधूमनस्यै रसृग्विमोक्षैश्च विवृद्धिमेति । निस्तुद्यते यस्य शिरोऽतिमात्रं संभक्ष्यमाणं स्फुरतीव चान्तः । घ्राणाच्च गच्छेत् सविलं सरक्तं शिरोऽभितापः कृमिभिः७ स घोरः । सूर्य्योदयं या प्रतिमन्दमन्दमक्षिभ्रुवं रुक् समुपैति गाढम् । विवर्द्धते चांशुमता सहैव सूर्य्यापवृत्तौ विनिवर्त्तते च । शीतेन शान्तिं लभते कदाचिदुष्णेन जन्तुः सुखमाप्नुयाच्च । तं भास्करावर्त्तमुदाहरन्ति सर्वात्मकं कष्टतमं विकारम् । दोषास्तु दुष्टास्त्रय एव मन्यां संपीड्य घाटां सुरुजां सुतीव्राम् । कुर्वन्ति साक्षिभ्रुवशङ्खदेशे स्थितिं करोत्याशु विशेषतस्तु । गण्डस्य पार्श्वे तु करोति कम्पं हनुग्रहं लोचनजांश्च रोगान् । अनन्तवातं८ तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारम् । यस्योत्तमाङ्गार्द्धमतीव जन्तोः सम्भेदतोदभ्रमशूलजुष्टम् । पक्षाद्दशाहादथ वाप्यकस्मात्तस्यार्द्धभेदं१० त्रितयाद्व्यवस्येत् । शङ्खाश्रितो वायुरुदीर्णवेगः कृतानुयात्रः कफपित्तरक्तैः । रुजः सुतीव्राः प्रतनोति मूर्ध्नि विशेषतश्चापि हि शङ्खयोस्तु । सुकष्टमेनं खलु शङ्खकाख्यं११ महर्षयो वेदविदः पुराणाः । व्याधिं वदन्त्युद्गतमृत्युकल्पं भिषक्सहस्रैरपि दुर्निवारम्” ।

**शिरोवल्ली** स्त्री शिरसा वल्लीव । मयूरचूडायां शब्दच० ।

**शिरोवृत्त** न० शिर इव वृत्तं वर्त्तुलम् । मरिचे राजनि० ।

**शिरोवृत्तफल** पु० शिरोवृत्तं मरिचमिव फलमस्याः । रक्तापामार्गे भावप्र० । [त्रिका० स्युट् । तत्रैव स० ।

**शिरोवेष्ट** पु० वेष्ट-घञ् शिरसो वेष्टः । (पागड़ी) उष्णीषे

**शिल** उञ्छे कणश आदाने तुदा० पर० सक० सेट् । शिलति अशेलीत् ।

**शिल** न० शिल-क । स्फीतशस्यात् क्षेत्रात्कणशोऽसङ्गत्यां दानकृपायां स्मृतौ उञ्छशब्दे १०७० पृ० दृश्यम् ।

२पाषाणे ३द्वाराधःस्थितकाष्ठखण्डे च (गोवराट) स्त्री अमरः । ४कल्यशीर्षे ५मनःशिलायां स्त्री मेदि० ६कर्पूरे राजनि० । [पाषाणभेदवृक्षे स्त्री राजनि० ।

**शिलगर्भजः** पु० शिलाया गर्भे जायते संज्ञायां कुत्सः ।

**शिलाकर्णी** स्त्री शिलेव कर्णमस्य ङीप् । शल्लकीवृक्षे शब्दच० ।

**शिलाकुट्टक** पु० शिलां कुट्टयति कुट्ट-ण्वुल् । १पाषाणभेदके अस्त्रभेदे शब्दच० । शिलया कुट्टति विदारणीकरोति । २अश्मकुट्टके वानप्रस्थभेदे ।

**शिलाज** न० शिलातो जायते जन-ड । १शैलेये गन्धद्रव्ये शब्दच० । २लौहे राजनि० ।

**शिलाजतु** न० शिलाजातं जतु । १पर्वतजाते उपधातुभेदे अमरः । तदुत्पत्त्यादिकं भावप्र० उक्तं यथा

“निदाघे घर्मसन्तप्ता धातुसारं धराधराः । निर्यासवत् प्रमुञ्चन्ति तच्छिलाजतु कीर्त्तितम् । सौवर्णं राजतन्ताम्रमायसन्तच्चतुर्विधम् । शिलाजत्वद्रिजतु च शैलनिर्यास इत्यपि । गैरेयमश्मजञ्चापि गिरिज शैलधातुजम् । शिलाजं कटु तिक्तोष्णं कटुपाकं रसायनम् । छेदि योगवहं हन्ति कफमेदाश्मशर्कराः । मूत्रकृच्छ्रं क्षयं श्वासं वाताशांसि च पाण्डुताम् । अपस्मारन्तथोन्मादं शोथकुष्ठोदरकृमीन् । सौवर्णन्तु जवापुष्पवर्णं भवति तद्रसात् । मधुरं कटुतिक्तञ्च शीतलं कटुपाकि च । राजतं पाण्डुरं शीतं कटुकं स्वादुपाकि च । ताम्रं मयूरकण्ठाभं तीक्ष्णमुष्णञ्च जायते । लौहं जटायुपक्षाभं तत्तिक्तं लवणं भवेत् । विपाके कटुकं शीतं सर्वश्रेष्ठमुदाहृतम्” । [ङीप् । कालाञ्जनीवृक्षे राजनि० ।

**शिलाञ्जनी** स्त्री शिला अज्यतेऽनया अन्ज-करणे-ल्युट्

**शिलाटक** पु० शिलेव अटति शिलामटति वा अट-ण्वुल् । १अट्टे २बिले च मेदि० ।

**शिलात्मज** न० शिलाया आत्मज इव । लौहे राजनि० ।

**शिलात्मिका** स्त्री शिलेव आत्मा यस्य कप् । (मूचि) मूषायां शब्दच० ।

**शिलाददु** पु० शिलाया दद्रुरिव । शैलेये गन्धद्रव्ये राजनि० ।

**शिलाधातु** पु० शिलाया धातुरमधातुरिव शुक्लत्वात् । १श्वेतोपले (खडी) त्रिका० । २पीतवर्णे गैरिकभेदे च राजनि० । [प्रस्तरखण्डभेदे शब्दच० ।

**शिलापुत्र** पु० शिलायाः पुत्र इव । (नोड़ा) पेषणसाधने

**शिलापुष्प** न० शिलायाः पुष्पमिव । शैलेये गन्धद्रव्ये राजनि० ।

**शिलाभव** न० शिलायां भवति भू-अच् ७त० । शैलेये जटाम०